सौवर्णो राजतो वेति स्मृतिचन्द्रिकायाम्। ताम्रिकमाषस्य कर्षपरिभाषितस्य षोडशो भागो भवति। अयमेव "पणस्य पञ्च वापि प्रकीर्त्तिताः" इति याज्ञवल्क्योक्तपञ्चकृष्णलपरिमितस्वरूपो पणचतुर्थोऽशस्य विंशतितमांशात्मककार्षापणस्य "माषो विंशतिमोभागः पणस्य परिकीर्त्तितः" इति नारदोक्तो विंशो भागोऽपि भवति। एतेन स्मृतिचन्द्रिकायाम् अपराधानुसारेण दण्डनार्थं माषो "विंशतिमो भागः पणस्य परिकीर्त्तितः" इति नारदोक्तो माषः कैश्चित् स्वीकृत इत्येकीयमतत्वेनोपन्यस्य "सञ्ज्ञा राजतताम्रजा मनुनासमुदाहृता। कार्षापणान्ता सा दिव्ये नियोज्या विनये तथा" इति वृहस्पतिवचनविरोधेन दूषितं तदुभयथाप्यर्थभेदाभावेन विरोधाभावान्निरस्तं मन्तव्यम्। यत्तु, मनुनोक्तम् "सपादं पणमर्हतीति" तत् स्वामिनो मतिपूर्वं पशुव्यतिक्रमविषयम्। याज्ञवल्क्यवचनन्त्वबुद्धिपूर्वविषयमिति न तयोर्विरोधः। यत्तु "पणस्य पादौ द्वौ गान्तु द्विगुणं महिषीं तथा। तथाजाविकवत्सानां पादो दण्डः प्रकीर्त्तितः" इति स्मृत्यन्तरं तद्भक्षयित्वोपविष्टगवादिविषयम्। यत् पुनर्नारदेनाभिहितम् "माषकां दापयेद्दण्डं द्वौ माषौ महिषीं तथा। तथा जाविकवत्सानां दण्डः स्यादर्द्धमाषिकः" इति। तन्मुखमात्रभक्षणविषयम् अतएवाहतुः शङ्खलिखितौ। "रात्रौ चरन्ती गौः पञ्चमाषां दिवा त्वोन्मुक्तौ माषं पाशे त्वदण्डमिति"। पाशे त्वदण्ड इत्यस्यायमर्थः। कण्ट्यादिभिः परशस्येषु कवलमात्रभक्षणे कथञ्चित् कृते पालकस्य स्वामिनो वा स्वल्पोऽपि दण्डो नास्तीति। आतुरपशुविषये बहुशस्यनाशेऽप्येवमेव दण्डाभावप्रतिपादनमुखेनाह नारदः "राजग्रहगृहीतो वा वज्राशनिहतोऽपि वा। अथ सर्पेण दष्टो वा वृक्षाद्वा पतितो भवेत्। व्याघ्रादिभिर्हतो वापि व्याधिभिर्वाप्युपद्रुतः। न तत्र दोषः पालस्य न च दोषोऽस्ति गोमिनाम्" इति। गोमिनां गोस्वामिनाम्। आतुराणामनिवार्यत्वादित्यभिप्रायः। अनातुराणामपि केषाञ्चित् पशूनां दण्डाभावमाह स एव "गौः प्रसूता दशाहात्तु महोक्षा वाजिकुञ्जराः। न निवार्याः प्रयत्नेन तेषां स्वामी न दण्डभाक्" इति। दशाहपर्य्यन्तं प्रसूताया निरोद्धुमशक्यत्वान्न स्वामी दण्डभाक्। महोक्षस्य सर्वासाञ्च गर्भाधानार्थं सर्वदा बन्धनायोगात् तत्स्वामी न दण्डभाक्। वाजिकुञ्जराणां स्वामिनोऽदण्डभागित्वे हेतुमाहोशनाः "अदण्ड्या हस्तिनो ह्यश्वा प्रजापाला हि ते स्मृताः" स्वामिग्रहणं पालकस्याप्युपलक्षणार्थम्। यदाह मनुः "अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा। सपालान् वा विपालान् वा अदण्ड्यान्मनुरब्रवीत्" इति। वृषाः महोक्षाः। यद्वा वृषोत्सर्गविधानेनोत्सृष्टाः। देवपशवः देवालयेषु देवोपभोगार्थं स्थापिताः पशवः। याज्ञवल्क्योऽपि "महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः। पालो येषाञ्च ते मोच्या दैवराजपरिप्लुताः"। अनिर्दशाहा आगन्तुकः स्वयूथात्परिभ्रष्टः सन् देशान्तरात् समागतः। येषां पालो नास्ति तेऽपि दैवराजोपहताः शस्यादिनाशकारिणो न दण्ड्या इत्यर्थः। आदिशब्देन हतवत्सादीनां ग्रहणम्। अतएवोशनाः "अदण्ड्या हतवत्सा च संज्ञा रोगवती कृशा। अदण्ड्याः काष्ठकूटाश्च वृषाश्च कृतलक्षणाः। अदण्ड्यागन्तुका गौश्च सूतिका चाभिसारिणी" इति। कूटः एकशृङ्गः। कृतलक्षणाः प्रतप्तायसेन कृतलाञ्छनाः। अभिसारिणी स्वयूथात् प्रच्युता पुनः स्वयूथगामिनी। परशस्यविनाशे न केवलं पशुस्वामी दण्डनीयः सदमपि दापनीय इत्याह वृहस्पतिः "शस्यानि चारयेद्यास्तु चीर्णे दोषो द्वयोर्भवेत्। स्वामी सदर्दं दण्ड्यः पालस्ताडनमर्हति" इति। सदश्च दमस्य सदृशम्। समूलशस्यनाशविषयमेतत्। अतएव नारदः "समूलशस्यनाशे तु तत्स्वामी प्राप्नुयात् सदम्। वधेन गौर्यो मुच्येत दण्डं स्वामिनि पातयेत्" इति। तत्स्वामी शस्यस्वामी सदं प्राप्नुयात्। पशुस्वामिनः सकाशादिति शेषः। वधोऽत्र कशादिना ताडनम्। न प्राणच्छेदः। पालस्ताडनमर्हतीति वचनात्। सदश्च सामन्तादिभिः परिकल्पितो देयः। अतएव स एवाह "गोभिस्तु भक्षितं शस्यं यो नरः प्रतियाचते। सामन्तानुमतं देयं धान्यं यत्तत्र वापितम्" इति। यत्तु सदयाचननिषेधनम् "गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते। पितरस्तस्य नाश्नन्ति न चापि त्रिदिवौकसः"। इत्युशनोवचनन्तद् ग्रामादिसमीपस्थनावृतक्षेत्रविषयमिति माधवाचार्य्याः। श्राद्धकालादौ गोभक्षितविषयमिति मदनरत्नकृतः। सर्वासाञ्च गवामुत्सवे श्राद्धदिवसे चादण्ड्यत्वमाह स एव "अदण्ड्या उत्सवे गावः श्राद्धकाले तथैव च" इति। गोभिः श्राद्धकालादौ भुक्तमतिश्रेयस्करमित्याशयेनाह। व्यासः "आक्रम्य च द्विजैर्भुक्तं परिक्षीणञ्च बान्धवैः। गोभिश्च नरशार्दूल।